शोणितम् । क्रव्यादीनां पशूनान्तु पक्षिणाञ्च शिरोऽसृजम् । वामे निवेदयेत् पार्श्वे जलजानाञ्च सर्व्वशः । कृष्णसारस्य कूर्म्मस्य खड्गस्य शशकस्य च । श्राहाणामथ मत्स्यानामस्य एव निवेदयेत् । सिंहस्य दक्षिणे दद्यात् खड्गिनोऽपि च दक्षिणे । पृष्ठदेशे न दद्यात्तु शिरो वा रुधिरं बलेः" कालिकापु० नानास्थानीयम् । "बलिदानेन विप्रेन्द्र ! दुर्गाप्रीतिर्भवेन्नृणाम् । हिंसाजन्यञ्च पापञ्च लभते नात्र संशयः । उत्सर्गकर्त्ता दाता च छेत्ता पोष्टा च रक्षकः । अग्रपश्चान्निरोद्धा च सप्तैते वधभागिनः । यो यं हन्ति स तं हन्ति चेति वेदोक्तमेव च । कुर्व्वन्ति वैष्णवीं पूजां वैष्णवास्तेन हेतुना" ब्रह्म० प्रकृ० ६१ । ६२ अ० । बलिदाननिन्दा यथा "पार्व्वत्युवाच । ये ममार्च्चनमित्युक्त्वा प्राणिहिंसन तत्पराः । तत् पूजनं ममामेध्यं यद्दोषात्तदधोगतिः । मदर्थे शिव ! कुर्व्वन्ति तामसा जीवघातनम् । आकल्पकोटि निरये तेषां वासो न संशयः । मम नाम्नाथ वा यज्ञे पशुहत्यां करोति यः । क्वापि तन्निष्कृतिर्नास्ति कुम्भीपाकमवाप्नुयात् । दैवे पैत्रे तथात्मार्थे यः कुर्य्यात् प्राणिहिंसनम् । कल्पकोटिशतं शम्भो ! रौरवे स वसेत् ध्रुवम् । यो मोहान् मानसैर्द्देहिहत्यां कुर्य्यात् सदाशिव ! । एकविंशतिकृत्वः स तत्तद्योनिषु जायते । यस्तु यज्ञे पशून् हत्वा कुर्य्यात् शोणितकर्द्दमम् । स पचेन्नरके तावद् यावल्लोमानि तस्य वै । हन्ता कर्त्ता तथोत्सर्गकर्त्ता धर्त्ता तथैव च । तुल्याभवन्ति सर्व्वे ते ध्रुवं नरकगामिनः । सम्मोहेशे पशून् हत्वा सरक्तं पात्रसत्वसृजेत् । यो मूढ़ः स तु पूयोदे वसेद्द देव ! न संशयः । देवतान्तरमन्त्राणामव्याजेन स्वेच्छया तथा । हत्वा जीवांस्ततो मोहात् नित्यं नरकमाप्नुयात् । यूपे बद्ध्वा पशून् हत्वा यः कुर्य्याद्रक्तकर्द्दमम् । तेन चेत् प्राप्यते स्वर्गो नरकं केन गम्यते । उपदेष्टा वधे हन्ता कर्त्ता भर्त्ता च विक्रयी । उत्सर्गकर्त्ता जीवानां सर्व्वेषां नरकं भवेत् । भक्ष्यस्यस्य वधायापि प्राणिनां क्रयविक्रये । तथा द्रष्टुश्च सूनायां कुम्भीपाको भवेद् ध्रुवम् । स्वयंकामाशयो भूत्वा योऽज्ञानेन विमोहितः । हन्त्यन्यात् विविधान् जीवान् कुर्य्यान्मन्नाम शङ्कर ! । तद्राज्यवंशसम्पत्तिज्ञातिदारादिकम्पदाम् । अचिराद्दै भवेन्नाशो मृतः स नरकं व्रजेत् । देवयज्ञे पितृश्राद्धे तथा माङ्गल्यकर्म्मणि । तस्यैव नरके वासो यः कुर्य्याज्जीवघातनम् । मद्व्याजेन पशून् हत्वा यो भक्षेत् सह बन्धुभिः । तद्गात्रलोमसंख्याब्दैरसिपत्रवने वसेत् । आवयोरन्यदेवानां नाम्ना च परकर्म्मणि । यः संपोष्य पशून् हन्यात् सोऽन्धतामिस्रमाप्नुयात् । पशून् हत्वा तथा त्वां मां योऽर्च्चयेन्मांसशोणितैः । तावत्तन्नरके वासो यावच्चन्द्रदिवाकरौ । निर्व्विघ्नभस्मतुल्यं तत् बहुद्रव्येण यत् कृतम् । यस्मिन् यज्ञे प्रभो ! शम्भो ! जीवहत्या भवेद्ध्रुवम् । यज्ञमारभ्य चेत् शक्रः कुर्य्याद्वै पशुघातनम् । स तदाऽधोगतिं गच्छेदितरेषाञ्च का कथा । आवयोः पूजनं मोहाद् ये कुर्य्युर्मांसशोणितैः । पतन्ति कुम्भीपाके ते भवन्ति पशवः पुनः । फलकामास्तु वेदोक्तैः पशोरालभनं मखे । पुनस्तत्तत् फलं भुक्त्वा ये कुर्व्वन्ति पतन्त्यधः । स्वर्गकामोऽश्वमेधं यः करोति निगमाज्ञया । तद्भोगान्ते पतेद्भूयः स जन्मनि भवार्णवे । ये हताः पशवो लोकैरिह स्वार्थेषु कोविदैः । ते परत्र तु तान् हन्युस्तथा खड्गेन शङ्कर !। आत्मपुत्रकलत्रादिसुसम्पत्तिकुलेच्छया । यो दुरात्मा पशून् हन्यात् आत्मादीन् घातयेत् स तु" । जानन्ति नो वेद पुराणतत्त्वं ये कर्मठाः पण्डितमानयुक्ताः । लोकाधमास्ते नरके पतन्ति कुर्व्वन्ति मूर्खाः पशुघातनञ्चेत् । येऽज्ञानिनो मन्दधियोऽकृतार्था भवे पशुं घ्नन्ति न धर्म्मशास्त्रम् । जानन्ति नाकं नरकं न मुक्तिं गच्छन्ति घोरं नरकं नरास्ते । शुद्धा अकारुण्या न विदन्ति शास्त्रा न धर्म्ममार्गं परमार्थतत्त्वम् । पापं न पुण्यं पशुघातका ये पूयोदवासो भवतीह तेषाम् । जीवानुकम्पां न विदन्ति मूढ़ा भ्रान्ताश्च येऽसत्पथिनोन धर्म्मम् । आर्त्तौ भवे प्राणिवधं तु कुर्य्युस्ते यान्ति मर्त्त्याः खलु रौरवाख्यम् । ततस्तु खलु जन्तूनां घातनं नो करिष्यति । शुद्धात्मा धर्म्मवान् ज्ञानी प्राणान्ते नैव मानवः । यदीच्छेदात्मनः क्षेमं त्यक्त्वाऽज्ञानं तदा नरः । जीवान् कानपि नो हन्यात् सङ्कटापन्न एव चेत् । सम्पत्तौ च विपत्तौ वा परलोकेच्छुकः पुमान् । कदाचित् प्राणिनो हत्यां न कुर्य्यात् तत्त्ववित् सुधीः । मानवो यः परत्रेह तच्छुभमिच्छेत् सदाशिव ! । सर्व्वविष्णुमयत्वेन न कुर्य्यात् प्राणिनां बधम् । बधाद्रक्षति यो मर्त्त्यो जीवान् तत्त्वज्ञ ! धर्म्मवित् । किं पुण्यं तस्य वक्ष्येऽहं ब्रह्माण्डं स तु रक्षति । यो रक्षेत् घातनात् शम्भो ! जीवमात्रं दयापरः । कृष्णप्रियतमो नित्यं सर्व्वरक्षां करोति सः । एकस्मिन्रक्षिते जीवे त्रैलोक्यं तेन रक्ष-